# श्री देवराजगुरुभिः अनुगृहीता
# ॥ पूर्व दिनचर्या ॥

सौम्यजामातृ योगीन्द्र चरणाम्बुज षट्पदम् ।
देवराजगुरुं वन्दे दिव्यज्ञान प्रदं शुभम् ॥

अङ्के कवेर कन्यायाः तुङ्गे भुवन मङ्गले ।
रङ्गे धाम्नि सुखासीनं वन्दे वरवरं मुनिम् ॥ 1

मयि प्रविशति श्रीमन् मन्दिरं रङ्गशायिनः ।
पत्युः पदाम्बुजं द्रष्टुं आयान्तं अविदूरतः ॥ 2

सुधानिधिं इव स्वैरस्वीकृतो दग्र विग्रहम् ।
प्रसन्नार्क प्रतीकाश प्रकाश परिवेष्टितम् ॥ 3

पार्श्वतः पाणि पद्माभ्यां परिगृह्य भवत्प्रियौ ।
विनयस्यन्तं शनैः अङ्घ्री मृदुलौ मेदिनीतले ॥ 4

आम्लान कोमलाकारं आताम्र विमलाम्बरम् ।
आपीन विपुलोरस्कं आजानुभुज भूषणम् ॥ 5

मृणाल तन्तुसन्तान संस्थान धवलत्विषा ।
शोभितं यज्ञसूत्रेण नाभि बिम्ब सनाभिना ॥ 6

अम्भोज बीज मालाभिः अभिजात भुजान्तरम् ।
ऊर्ध्व पुण्ड्रैः उपश्लिष्टं उचित स्थान लक्षणैः ॥ 7

काश्मीर केसरस्तोम कडारस्निग्ध रोचिषा ।
कौशेयेन समिन्धानं स्कन्धमूल अवलम्बिना ॥ 8

मन्त्र रत्न अनुसन्धान सन्तत स्फुरिताधरम् ।
तदर्थ तत्व निध्यान सन्नद्ध पुलकोद्गमम् ॥ 9

स्मयमान मुखाम्भोजं दयमान दृगञ्चलम् ।
मयि प्रसाद प्रवणं मधुरोदार भाषणम् ॥ 10

आत्मलाभात् परं किञ्चित् अन्यन्नास्ति इति निश्चयात् ।
अङ्गी कर्तुं इव प्राप्तं अकिञ्चनं इमं जनम् ॥ 11

भवन्तं एव नीरन्ध्रं पश्यन् वश्येन चेतसा ।
मुने! वरवर! स्वामिन् मुहुः त्वां एव कीर्तयन् ॥ 12

त्वदन्य विषय स्पर्श विमुखैः अखिलेन्द्रियैः ।
भवेयं भव दुःखानां असह्यानां अनास्पदम् ॥ 13

परेद्युः पश्चिमे यामे यामिन्याः समुपस्थिते ।
प्रबुध्य शरणं गत्वा परां गुरुपरम्पराम् ॥ 14

ध्यात्वा रहस्य त्रितयं तत्व याथात्म्य दर्पणम् ।
पर व्यूहादिकान् पत्युः प्रकारान् प्रणिधाय च ॥ 15

ततः प्रत्युषसि स्नात्वा कृत्वा पौर्वाह्णिकीः क्रियाः ।
यतीन्द्र चरण द्वन्द्व प्रवणेनैव चेतसा ॥ 16

अथ रङ्ग निधिं सम्यक् अभिगम्य निजं प्रभुम् ।
श्रीनिधानं शनैः तस्य शोधयित्वा पदद्वयम् ॥ 17

ततः तत् सन्निधि स्तम्भ मूल भूतल भूषणम् ।
प्राङ्मुखं सुखं आसीनं प्रसाद मधुरस्मितम् ॥ 18

भृत्यैः प्रिय हितैकाग्रैः प्रेम पूर्वं उपासितम् ।
तत् प्रार्थन अनुसारेण संस्कारान् संविधाय मे ॥ 19

अनुकम्पा परीवाहैः अभिषेचन पूर्वकम् ।
दिव्यं पदद्वयं दत्त्वा दीर्घं प्रणमतो मम ॥ 20

साक्षात् फलैक लक्ष्यत्व प्रतिपत्ति पवित्रितम् ।
मन्त्र रत्नं प्रयच्छन्तं वन्दे वरवरं मुनिम् ॥ 21

ततः सार्धं विनिर्गत्य भृत्यैः नित्यानपायिभिः ।
श्रीरङ्ग मङ्गलं द्रष्टुं पुरुषं भुजगेशयम् ॥ 22

महति श्रीमति द्वारे गोपुरं चतुराननम् ।
प्रणिपत्य शनैः अन्तः प्रविशन्तं भजामि तम् ॥ 23

देवी गोदा यतिपति शटद्वेषिणौ रङ्ग श्रुङ्गं
सेनानाथो विहग वृषभः श्रीनिधिः सिन्धु कन्या ।
भूमानिला गुरुजनवृतः पुरुषः चेत्यमीषां अग्रे
अग्रे नित्यं वरवरमुनेः अङ्घ्रि युग्मं प्रपध्ये ॥ 24

मङ्गळाशासनं कृत्वा तत्र तत्र यथोचितम् ।
धाम्नः तस्मात् विनिष्क्रम्य प्रविश्य स्वं निकेतनम् ॥ 25

अथ श्रीशैल नाथार्य नाम्नि श्रीमति मण्डपे ।
तदङ्घ्रि पङ्कज द्वन्द्वः छाया मध्य निवासिनाम् ॥ 26

तत्त्वं दिव्यप्रबन्धानां सारं संसार वैरिणाम् ।
सरसं सरहस्यानां व्याचक्षाणं नमामि तम् ॥ 27

ततः स्वचरणाम्भोज स्पर्श सम्पन्न सौरभैः ।
पावनैः अर्थिनस्तीर्थैः भावयन्तं भजामि तम् ॥ 28

आराध्य श्रीनिधिं पश्चात् अनुयागं विधाय च ।
प्रसाद पात्रं मां कृत्वा पश्यन्तं भावयामि तम् ॥ 29

ततः चेतः समाधाय पुरुषे पुष्करेक्षणे ।
उत्तंसित कर द्वन्द्वं उपविष्टं उपह्वरे ॥ 30

अब्जासनस्थं अवदात सुजात मूर्तिं
आमीलिताक्षं अनुसंहित मन्त्र रत्नम् ।
आनम्रमौलिभिः उपासितं अन्तरङ्गैः
नित्यं मुनिं वरवरं निभृतो भजामि ॥ 31

ततः शुभाश्रये तस्मिन् निमग्नं निभृतं मनः ।
यतीन्द्र प्रवणं कर्तुं यतमानं नमामि तम् ॥ 32

**॥ इति पूर्व दिनचर्या समाप्ता ॥**

---